यन्त्रगोलः, पुं, कलायविशेषः । इति शब्दचन्द्रिका । मटर इति भाषा ॥

यन्त्रणं, क्ली, (यन्त्र + ल्युट् ।) रक्षणम् । बन्धनम् । (यथा, सुश्रुते सूत्रस्थाने अष्टादशाध्याये । "यन्त्रणमत ऊर्द्ध्वमधस्तिर्य्यक् ।") नियमनम् । इति मेदिनी । णे, ७१ । (यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये ।
"रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात् ।
व्रणितस्य भवेच्छोषः स चासाध्यतमस्ततः ॥")

यन्त्रणा, स्त्री, (यन्त्रि + "ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् । टाप् ।) पीड़ा । यथा, नैषधे । ४ । १० ।
"मदनतापभरेण विदीर्य्य नो
यदुदपाति हृदा दमनस्वसुः ।
निविड़पीनकुचद्वययन्त्रणा
तमपराधमधात् प्रतिबध्नती ॥"
(पीड़ाशब्देऽस्या विशेषो विज्ञेयः ॥)

यन्त्रपेषणी, स्त्री, (पिष्यतेऽनयेति । पिष् । करणे ल्युट् । ङीप् । यन्त्रमेव पेषणी ।) पेषणार्थयन्त्रम् । इति जटाधरः ॥ याँता इति भाषा ॥

यन्त्रिका, स्त्री, (यन्त्रयति ज्ञातकौतुकां पीड़यतीति । यन्त्रि + ण्वुल् । टापि अत इत्वम् ।) पत्न्याः कनिष्ठा भगिनी । यथा, हेमचन्द्रे ।
"कनिष्ठा श्यालिका हाली यन्त्रिका केलिकुञ्चिका ॥"

यन्त्रितः, त्रि, (यन्त्रि + क्त ।) बद्धः । इति धरणिः ॥ (यथा, देवीभागवते । ३ । १७ । १७ ।
"ते धृत्वा जह्रुर्धेनुं हठादाक्रम्य यन्त्रिताम् ।
वेपमाना मुनिं प्राह सुरभिः साश्रुलोचना ॥")

यन्त्री, [न्] त्रि, यन्त्रविशिष्टः । यन्त्रशब्दादस्त्यर्थे इन्प्रत्ययेन निष्पन्नः ॥ (यन्त्रयति बध्नातीति । यन्त्रि बन्धने + णिनिः । बन्धनकारकः । यथा, रामायणे । १ । १ । ७६ ।
"अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात् ।
मर्षयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया ॥")

यभ, ऌ मैथुने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) ऌ, अयाप्सीत् । यभति युवा । इति दुर्गादासः ॥

यम, ऌ उ विरतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् । क्त्वावेट् ।) ऌ, यन्ता । उ, यमित्वा यन्त्वा । विरतिर्निवृत्तिः । यच्छति पापात् साधुः । इति दुर्गादासः ॥

यम, क मि परिवेषणे । तद्भावे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क मि, यमयति यामयति । परिवेषणं अन्नादेरर्पणम् । वेष्टनमित्यन्ये । विषयव्याप्तिर्विषस्य रूपमिति रमानाथः । केचित्तु परिवेषण एवायं ज्ञानुबन्धः । यमयत्यन्नं द्विजाय गृही । अन्यत्र नियामयति संयामयति इत्याहुः । अन्ये तु अपरिवेषण एवायं मानुबन्धः । 'नियमयति विमार्गप्रस्थितानान्तु दण्डम् ।' इति शाकुन्तले । परिवेषणे तु यामयत्यन्नं द्विजाय गृही इत्याहुः । तेन उभयस्य प्रामाणिकत्वादुभयत्र विकल्पज्ञापनार्थं मानुबन्धः कृतः । इति दुर्गादासः ॥

यमः, पुं, (यमयति नियमयति जीवानां फलाफलमिति । यम् + अच् ।) दक्षिणदिक्पालः । तत्पर्य्यायः । धर्म्मराजः २ पितृपतिः ३ समवर्त्ती ४ परेतराट् ५ कृतान्तः ६ यमुनाभ्राता ७ शमनः ८ यमराट् ९ कालः १० दण्डधरः ११ श्राद्धदेवः १२ वैवस्वतः १३ अन्तकः १४ । इत्यमरः । १ । १ । ६१ ॥ धर्म्मः १५ धर्म्मराट् १६ जीवितेशः १७ महिषध्वजः १८ औड़ुम्बरः १९ दण्डधारः २० कीनाशः २१ दध्नः २२ महिषवाहनः २३ शीर्णपादः २४ भीमशासनः २५ कङ्कः २६ हरिः २७ । इति शब्दरत्नावली ॥ कर्म्मकरः २८ । इति जटाधरः ॥ * ॥ चतुर्दशयमतर्पणं यथा,—
"यां काञ्चित् सरितं प्राप्य कृष्णपक्षे चतुर्द्दशीम् ।
यमुनायां विशेषेण नियतस्तर्पयेद्यमान् ॥
यमाय धर्म्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च ॥
औड़ुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥
एकैकस्य तिलैर्मिश्रांस्त्रींस्त्रीन् दद्यात् जलाञ्जलीन् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥"
इति तिथ्यादितत्त्वधृतभविष्यपुराणवचनम् ॥
तस्योत्पत्तिर्यथा,—
"संज्ञा च रविणा दृष्टा निमीलयति लोचने ।
यतस्ततः सरोषोऽर्कः संज्ञां निष्ठुरमब्रवीत् ॥
मयि दृष्टे सदा यस्मात् कुरुषे नेत्रसंयमम् ।
तस्माज्जनिष्यसे मूढ़े ! प्रजासंयमनं यमम् ॥"
मार्कण्डेय उवाच ।
"ततस्तस्यास्तु संजज्ञे भर्तृशापेन तेन वै ।
यमश्च यमुना चेयं प्रख्याता सुमहानदी ॥'
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तरे ७७ अः ॥
पुण्यात्मनां सम्बन्धे तस्य रूपं यथा,—
"तानागतांस्ततो दृष्ट्वा नरान् धर्म्मपरायणान् ।
भास्करिः प्रीतिमासाद्य स्वयं नारायणो भवेत् ॥
चतुर्ब्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः ।
शङ्खचक्रगदापद्मधारी गरुड़वाहनः ॥
स्वर्णयज्ञोपवीती च स्मेरचारुतराननः ।
किरीटी कुण्डली चैव वनमालाविभूषितः ॥"
पापिनां सम्बन्धे तस्य रूपं यथा,—
"त्रिंशद्योजनदीर्घाङ्गो वापीसदृशलोचनः ।
धूम्रवर्णो महातेजाः प्रलयाम्भोधरध्वनिः ॥
तृणाधिराजलोमा च ज्वलदग्निशिखाग्रवत् ।
नासारन्ध्रस्फुरच्छ्वासस्वनैर्ज्जितमहानिलः ॥
सुदीर्घदशनश्रेणिः सर्पोपमनखावलिः ।
प्रचण्डमहिषारूढ़ः संदष्टदशनच्छदः ॥
दण्डहस्तश्चर्म्मवासा भ्रूकुटीकुटिलाननः ॥'
इति पाद्मे क्रियायोगसारे २२ अध्यायः ।
अस्यानधिकारी यथा,—
"प्रोवाच धर्म्मं यदहं ब्रवीमि
कार्य्यं त्वया तत् खलु धर्म्मराज ! ॥
ब्रह्मोवाच ।
ये भक्ताः पुण्डरीकाक्षे कर्म्मणा मनसा गिरा ।
स्वकर्म्मनिरता दान्ता न नियम्या हि ते त्वया ॥
कृष्णः संपूजितो यैस्तु यैः कृष्णः समुपासितः ।
यैश्च नित्यं स्तुतः कृष्णो न ते त्वद्विषयोपगाः ॥
नमः कृष्णाच्युतानन्त वासुदेवेत्युदीरितम् ।
यैर्भावभावितो धर्म्म ! न ते त्वद्विषयोपगाः ॥
दानं ददद्भिर्य्यैरुक्तमच्युतः प्रीयतामिति ।
श्रद्धापुरःसरैर्धर्म्म ! न ते त्वद्विषयोपगाः ॥
उत्तिष्ठद्भिः स्वपद्भिश्च व्रजद्भिश्च जनार्द्दनः ।
यैः स्तुतस्तु सदा धर्म्म ! न ते त्वद्विषयोपगाः ॥
सर्व्वबाधासु ये कृष्णं संस्मरन्त्युच्चरन्ति च ।
तद्भावभाविनो ये च न ते त्वद्विषयोपगाः ॥
स एव धाता सर्व्वस्य तन्नियोगकरा वयम् ।
यमसंयमने व्यक्तः सोऽस्मत्संयमको हरिः ॥"
इति वह्निपुराणे नरसिंहप्रादुर्भावाध्यायः ॥
अपि च ।
ब्राह्मण उवाच ।
"यत् कृत्वा सुमहत् पुण्यं धर्म्माधर्म्मविनिर्णये ।
प्रमाणं त्वं हि लोकानां फलं मे ब्रूहि तद्यम ! ॥"
यम उवाच ।
यमो यम इति श्रुत्वा वृथा ह्युद्विजते जनः ।
आत्मा च यमितो येन न तस्यैव यमः स्मृतः ॥
आनृशंस्यं क्षमा सत्यमहिंसा दम आर्ज्जवम् ।
ध्यानं प्रसादो माधुर्य्यं सन्तोषश्च यमा दश ॥
यमैश्च नियमैश्चैव यः करोत्यात्मसंयमम् ।
स चाहत्वा तु मां याति परं ब्रह्म सनातनम् ॥"
इति तत्रैव यमशर्म्मिलोपाख्यानम् ॥ * ॥
सावित्रीकृतं यमाष्टकं स्तोत्रं यथा,—
सावित्र्युवाच ।
"तपसा धर्म्ममाराध्य पुष्करे भास्करः पुरा ।
धर्म्मांशं यं सुतं प्राप धर्म्मराजं नमाम्यहम् ॥१॥
समता सर्व्वभूतेषु यस्य सर्व्वस्य साक्षिणः ।
अतो यन्नाम शमनमिति तं प्रणमाम्यहम् ॥२॥
येनान्तश्च कृतो विश्वे सर्व्वेषां जीविनां परम् ।
कर्म्मानुरूपकाले च तं कृतान्तं नमाम्यहम् ॥३॥
बिभर्त्ति दण्डं दण्डाय पापिनां शुद्धिहेतवे ।
नमामि तं दण्डधरं यः शास्ता सर्व्वदेहिनाम् ॥४॥
विश्वं च कलयत्येव यः सर्व्वायुश्च सन्ततम् ।
अतीव दुर्न्निवार्य्यञ्च तं कालं प्रणमाम्यहम् ॥५॥
तपस्वी वैष्णवो धर्म्मी संयमी विजितेन्द्रियः ।
जीविनां कर्म्मफलदस्तं यमं प्रणमाम्यहम् ॥ ६ ॥
स्वात्मारामश्च सर्व्वज्ञो मित्रः पुण्यकृतां भवे ।
पापिनां क्लेशदो यस्तं पुण्यमित्रं नमाम्यहम् ॥७॥
यज्जन्म ब्रह्मणो वंशे ज्वलन्तं ब्रह्मतेजसा ।
यो ध्यायति परं ब्रह्म ब्रह्मवंशं नमाम्यहम् ॥८॥
इत्युक्त्वा सा च सावित्री प्रणनाम यमं मुने ।
यमस्तां विष्णुभजनं कर्म्मपाकमुवाच ह ॥